# Ganeshashtakam

# ગણેશાષ્ટકમ્

## Document Information

Text title : Ganesha Ashtaka

File name : gaNeshAShTakam.itx

Category : aShTaka, ganesha

Location : doc_ganesha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 91 | 1.91 44-51|| phalashrutiH added from Malayalam Sthothra Rathnaakaram

Latest update : August 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ગણેશાષ્ટકમ્

યતોઽનન્તશક્તેરનન્તાશ્ચ જીવા
યતો નિર્ગુણાદપ્રમેયા ગુણાસ્તે ।
યતો ભાતિ સર્વં ત્રિધા ભેદભિન્નં
સદા તં ગણેશં નમામો ભજામઃ ॥ ૧॥

યતશ્ચાવિરાસીજ્જગત્સર્વમેત-
ત્તથાબ્જાસનો વિશ્વગો વિશ્વગોપ્તા ।
તથેન્દ્રાદયો દેવસઙ્ઘા મનુષ્યાઃ
સદા તં ગણેશં નમામો ભજામઃ ॥ ૨॥

યતો વહ્નિભાનૂ ભવો ભૂર્જલં ચ
યતઃ સાગરાશ્ચન્દ્રમા વ્યોમ વાયુઃ ।
યતઃ સ્થાવરા જઙ્ગમા વૃક્ષસઙ્ઘા-
સ્સદા તં ગણેશં નમામો ભજામઃ ॥ ૩॥

યતો દાનવા કિન્નરા યક્ષસઙ્ઘા
યતશ્ચારણા વારણા શ્વાપદાશ્ચ ।
યતઃ પક્ષિકીટા યતો વીરુધશ્ચ
સદા તં ગણેશં નમામો ભજામઃ ॥ ૪॥

યતો બુદ્ધિરજ્ઞાનનાશો મુમુક્ષોઃ
યતઃ સમ્પદો ભક્તસન્તોષિકાઃ સ્યુઃ ।
યતો વિઘ્નનાશો યતઃ કાર્યસિદ્ધિઃ
સદા તં ગણેશં નમામો ભજામઃ ॥ ૫॥

યતઃ પુત્રસમ્પદ્યતો વાઞ્છિતાર્થો
યતોઽભક્તવિઘ્નાસ્તથાનેકરૂપાઃ ।
યતઃ શોકમોહૌ યતઃ કામ એવ
સદા તં ગણેશં નમામો ભજામઃ ॥ ૬॥

યતોऽનન્તશક્તિઃ સ શેષો બભૂવ
    ધરાધારણેऽનેકરૂપે ચ શક્તઃ ।
યતોऽનેકધા સ્વર્ગલોકા હિ નાના
    સદા તં ગણેશં નમામો ભજામઃ ॥ ૭॥

યતો વેદવાચો વિકુણ્ઠા મનોભિઃ
    સદા નેતિ નેતીતિ યત્તા ગૃણન્તિ ।
પરબ્રહ્મરૂપં ચિદાનન્દભૂતં
    સદા તં ગણેશં નમામો ભજામઃ ॥ ૮॥

ઇતિ શ્રીગણેશપુરાણે ઉપાસનાખણ્ડે એકનવતિતમોऽધ્યાયે
        ગણેશાષ્ટકં સમ્પૂર્ણમ્ ॥

(ફલશ્રુતિઃ ।
પુનરૂચે ગણાધીશઃ સ્તોત્રમેતત્પઠેન્નરઃ ।
ત્રિસન્ધ્યં ત્રિદિનં તસ્ય સર્વકાર્યં ભવિષ્યતિ ॥ ૯॥

યો જપેદષ્ટદિવસં શ્લોકાષ્ટકમિદં શુભમ્ ।
અષ્ટવારં ચતુર્થ્યાં તુ સોऽષ્ટસિદ્ધીરવાપ્નુયાત્ ॥ ૧૦॥

યઃ પઠેન્માસમાત્રં તુ દશવારં દિને દિને ।
સ મોચયેદ્બન્ધગતં રાજવધ્યં ન સંશયઃ ॥ ૧૧॥

વિદ્યાકામો લભેદ્વિદ્યાં પુત્રાર્થી પુત્રમાપ્નુયાત્ ।
વાઞ્છિતાન્ લભતે સર્વાનેકવિંશતિવારતઃ ॥ ૧૨॥

યો જપેત્પરયા ભક્ત્યા ગજાનનપદો નરઃ ।
એવમુક્ત્વા તતો દેવશ્ચાન્તર્ધાનં ગતઃ પ્રભુઃ ॥ ૧૩॥)

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડઃ । અધ્યાય ૯૧ । ૧।૯૧ ૪૪-૫૧॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH . adhyAya 91 . 1.91 44-51..

Phalashruti was entered from the Malayalam book
Sthothra Rathnaakaram,
edited by N. Bappuravu, 2010, BSR Shivdutta
Devi book stall, Kodumgallur, Kerala

Proofread by PSA Easwaran

*Ganeshashtakam*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*